ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. X Oct,2017 - Mar,2018 No.2

वर्षम् – १०, अक्टूबर २०१७ – मार्च २०१८, अङ्कः – द्वितीयः

# प्राचीसुधा

# PRACI SUDHA

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned by CamScanner

# ऋग्वेदे मण्डूकः

डॉ.शत्रुघ्नपाणिग्राही

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जयते वृष्टिर्वृष्टेरन्नं ततः प्रजा ।।[१]

भगवता श्रीकृष्णेनापि एतत् विचारितम् ।[२] अतः वृष्टिप्राप्त्यर्थं वयं यज्ञसम्पादनं कुर्मः । यज्ञकर्मणि देवाः स्तूयन्ते । यतोहि ते मनुष्येभ्यः भक्तेभ्यः जीवेभ्यः जगते च वृष्टिरूपं धनं ज्ञानं वा प्रयच्छन्ति । तथैव मण्डूकसूक्तेऽपि मण्डूकस्य स्तुतिर्भवति । ऋग्वेदे अस्य मण्डूकदेवस्य महत्त्वपूर्णं स्थानं विद्यते । वृष्टिकामनायाम् अस्य सूक्तस्य पाठः क्रियते ।

सर्वं खल्विदं ब्रह्मेति[३] छान्दोग्योपनिषदि श्रूयते । अनेन न्यायेन जीवः अपि ब्रह्मणः चिदंशः । यथा ब्रह्म नितरां कल्याणमयं तथैव आचरणीयं जीवने प्रयतितव्यम् । जीवः केवलं प्रार्थनया एतस्मिन् प्रवृत्तिमार्गे गन्तुं पारयति । इयं सृष्टिः नानाविधैः कर्मव्यापारैः व्यापृता । एवंभूतायाः सृष्टेः सञ्चालनार्थं देवताः अपि अनेकाः भवन्ति । तेषु गवाश्वाद्याः केचन जीवाः अपि देवतावत् स्तूयन्ते ।[४] अस्मिन् सूक्ते जीवरूपमण्डूकस्य स्तुतिर्भवति । ऋग्वेदीयमण्डुकसूक्तस्य देवता मण्डूकः । मन्त्रद्रष्टा ऋषिः वसिष्ठः । अस्मिन् मण्डूकसूक्ते दश मन्त्राः सन्ति । निरुक्तग्रन्थे श्रूयते - "वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव । तं मण्डूका अन्वमोदन्त । स मण्डूकाननुमोदमानान् दृष्ट्वा तुष्टाव" इति ।[५] "मण्डूका मज्जुका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणाः, मण्ड एषामोक इति वा, मण्डो मदेर्वा मुदेर्वा तेषामेषा भवतीति ।[६] वृष्टिकामनां कृत्वा वसिष्ठऋषिः पर्जन्यस्य स्तुतिं करोति यस्यानुमोदनं मण्डूकेन क्रियते । अपि च अथर्ववेदे श्रूयते –

उपप्रवद मण्डूकि वर्षमा वद तादुरि ।
मध्ये ह्रदय प्लवस्य विगृह्य चतुरः पदः ।।[७]

ऋग्वेदे जन्तूनां विविधगुणक्रियावर्णनं दृश्यते । तेषु मण्डूकः वर्षासूचनां प्रददाति । तथैव उलूकः मृत्युसूचनां यच्छति ।[८] शुक्लयजुर्वेदस्याध्ययनेन ज्ञायते पक्षिणामुल्लेखः ऋतुभिः सह वर्तते । कपिञ्जलपक्षी वसन्तस्यागमनविषये, कलविङ्कः ग्रीष्मस्यागमनविषये, तित्तिरिपक्षी वर्षाकालस्यागमनविषये सूचनां ददाति ।[९] अस्मिन्

Scanned by CamScanner

सूक्ते मण्डूकस्य तुलना व्रतचारिभिः याज्ञिकैः सह स्वाध्यायशीलावेदपाठिभिः सह क्रियते । संवत्सरसत्रात्मकं कर्म आचरन्तः याज्ञिकाः एकवर्षानन्तरं दृष्टिपथे आगच्छन्ति । तथैव इमे मण्डुकाः वर्षपर्यन्तं मौनव्रतं धारयित्वा बिलेषु तिष्ठन्ति ।

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ।।[१०]

पुनश्च यथा वेदपाठिनः छात्राः स्वाध्यायमाचरन्ति तथैव वर्षाकाले वर्षाजलमवाप्य मण्डूकाः प्रसन्नाः भवन्ति तथा च मण्डूकेषु एकः कश्चित् तथैवान्यः परस्परम् एको हि अपरं गृह्णाति । यदा दिव्या आपः एतान् शुष्कशरीरान् जलकामयमानान् मण्डूकानभिषिञ्चन्ति तदा अक्खल इति शब्दानुकरणं कृत्वा एक मण्डूकः अपरं शब्दयन्तं मण्डूकं तथैव उपैति यथा पुत्रः पितरमुपगच्छति ।[११] यदा वर्षतौ मेघो वर्षति तदा मण्डूकाः आनन्दमनुभवन्तः, समूहबद्धाः भवन्ति । यथा द्वौ मण्डूकौ हृष्टौ भवतः, तदा अनयोः एकः अपरं गृह्णाति तथा च वर्षाजलेन स्नातः चित्रवर्णः मण्डूकः प्रसन्नः भूत्वा उत्प्लवनं कुर्वन् हरिद्वर्णेन अन्येन मण्डूकेन वाचं योजयति । ते मण्डूकाः परस्परं यथा छात्रः करोति तथैव कश्चिदेकः मण्डूकः अन्यस्य मण्डूकस्य वाचमनुसरति ।[१२] देवनियममनुपालयन्तः इमे मण्डूकाः वर्षाकाले एव प्रादुर्भवन्ति । वर्षर्तौ इमे मण्डूकाः सरस्यां निश्चलाः तिष्ठन्ति । इमे मण्डूकाः मन्ये शुष्कचर्मभाण्डमिव नीरसे जलाशये निवसन्तः शिथिलायमाना दरीदृश्यन्ते । परन्तु यदा वर्षाजलं तेषु पतति तदा सहसैव ते शब्दायन्ते । यदा सायं काले वनादागमनान्तरं वत्सैः संयुक्ताः गावः शब्दायन्ते तदा गोशालायां महान् घोषः उपजायते, तद्वत् वर्षाकालेऽपि मण्डूकाः वर्षाजलमवाप्य शब्दायन्ते ।[१३]

यथा देवाः जनेभ्यः धनं प्रयच्छन्ति तथैव मण्डूकदेवाः अपि धनमायुः यशः बलञ्च प्रजाभ्यः वितरन्ति । गौरिवशब्दकरी मण्डूकः अस्मभ्यं धनानि ददातु । अजशब्दवत् शब्दकरी मण्डूकः धनानि ददातु । पृश्निमण्डूकः धनानि ददातु । हरितः मण्डूकः धनानि ददातु । सहस्रसंख्याकाः ओषधयः जायन्ते यस्मिन् काले, तस्मिन् वर्षाकाले समुपगते सति इमे विविधप्रकारकाः मण्डूकाः गवां शतानि ददतः अस्माकम् आयुः प्रवर्धयन्ति । अतः जीवपुरुषोऽपि मण्डूकदेवस्य स्तुतिं करोति । श्रूयते यथा –

गोमायुरदादजमायुरदात् पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ।।[१४]

मण्डूकाः बहुविधाः भवन्ति । एषां मण्डूकानां मध्ये एकः गौरिवशब्दं करोति, अपरः अजा इव शब्दायते, एकः पृश्निवर्णः अस्ति, अपरश्च हरितवर्णः ।

Scanned by CamScanner

परन्तु इमे स्वरूपतो भिन्ना अपि एकः मण्डूकः इति नाम धारयन्तः विविधेषु प्रदेशेषु समानमेव शब्दं कुर्वन्तः प्रादुर्भवन्ति ।[१५] पुनश्च तत्रैव श्रूयते –

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ।।[१६]

अर्थात् यथा अतिरात्रनामके यज्ञे सोमयागे च ब्राह्मणाः कर्मकाण्डसम्बन्धान् मन्त्रान् उच्चारयन्तः संवत्सरस्य, संवत्सराख्यस्य वा सत्रयागस्य दिने यज्ञशालां परितः तिष्ठन्ति तथैव हे मण्डूकाः! यूयमपि सम्प्रति मन्ये प्रावृट्काले जलपूर्णसरोभितः टर्रटर्रायमाणाः तष्ठथ ।। इति ।।

पुनश्च वार्षिकं स्तोत्रशस्त्रात्मकं यज्ञं कुर्वन्तो ब्राह्मणा इव इमे मण्डूकाः शब्दं कुर्वन्ति । धर्मेण प्रवर्ग्येण चरन्तः अध्वरस्य नेतार ऋत्विजः इव स्विद्यद्गात्राः धर्मकालेऽभिगूढाः केचन मण्डूकाः अधुना वृष्टौ सत्याम् उत्पद्यन्ते । श्रूयते यथा –

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परीवतसरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न केचित् ।।[१७]

वर्षाकालस्य नेतारः एते मण्डूकाः देवनियममनुपालयन्तो नियति वर्षर्तौ एव प्रादुर्भवन्ति । मण्डूकानां टर्र–टर्रशब्दः वर्षायाः संकेतं ददाति ।[१८] अत एव द्वादशमासात्मकस्य वर्षस्य ऋतुं न हिंसन्ति अर्थात् वर्षपर्यन्तस्य ऋतुचक्रगतस्य कस्यचिदंशस्य ऋतुविशेषं वा नातिक्रमन्ति । वर्षे पूर्णे सति वर्षर्तौ आगते सति निदाघतापेन पीडिताः सम्प्रति बिलान्मोचनं प्राप्नुवन्ति ।[१९]

निष्कर्षरूपेण वक्तुमिच्छामि यत् "अहिंसा परमो धर्मः" इति भावनया यदि मानवः जीवहिंसां न करोति तत् धर्मकार्यमेव भवति । धर्मदृष्ट्या जनस्य सञ्चरणमार्गः आदौ हिंसारहितत्वेन स्तितिरेव ।[२०] वेद एव खलु अस्मन्मतस्य अतीव मुख्यं प्रमाणम् ।[२१] हिंसनं नाम बाधाजननम् । अद्य अनेके चिकित्सकजनाः अभ्यासच्छलेन जलस्थान् मण्डूकान् हिंसन्ति । तेषां मण्डूकानां शरीरे अस्त्रोपचारं विधाय त्यजन्ति, केचन पाश्चात्यजनाः तानेव भक्षयन्ति । परन्तु शास्त्रेषु जीवहिंसानिषेधो वर्तते । अतः जीवहिंसायाः विरोधं कुर्वन्तः तेषां जीवनरक्षणम् अस्माकं परमकर्तव्यं वर्तते ।

---

## सन्दर्भसूची –

१. मनुस्मृतिः – ३/७६ ।
२. श्रीमद्भगवद्गीता – ३/१० ।
३. छान्दोग्योपनिषद् – ३/१४ ।
४. अथर्ववेदः – ४/२१/१ ।
५. निरुक्तम् – ९/१/६ ।
६. तत्रैव – ९/१/३
७. अथर्ववेदः – ४/१५/१४ ।
८. ऋग्वेदः – १०/१६६/४ ।
९. यजुर्वेदः – २४/२० ।
१०. ऋग्वेदः – ७/१०३/१, अथर्ववेदः – ४/१५/१३ ।
११. यदीमेनां उशतो अभ्यवर्षीत् तृष्यावतः प्रावृष्यागतायाम् ।
अक्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ।। ऋग्वेदः – ७/१०३/३

१२. यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ।। ऋग्वेदः – ७/१०३/५

१३. दिव्या आपो अभि यदेनमायन् दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ।। ऋग्वेदः – ७/१०३/२

१४. तत्रैव – ७/१०३/१० ।

१५. गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ।। ऋग्वेदः – ७/१०३/६

१६. तत्रैव – ७/१०३/७ । १७. तत्रैव – ७/१०३/८ ।

१८. पर्जन्याय मण्डूकान् – शु.यजुर्वेदः – २४/२१ ।

१९. देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता धर्मा अश्नुवते विसर्गम् ।। ऋग्वेदः – ७/१०३/९ ।

२०. मनुस्मृतिः – १०/६३ ।

२१. यजुर्वेदः – १/१. १३/४७, १३/४८, १३/४९, १३/५०, १६/१७

---

## सहायकग्रन्थसूची –


१. निरुक्तम्–श्रीछज्जुरामशास्त्रीकृत–हिन्दी अनुवादसहितम्, मेहरचन्दलछमन–दासपब्लिकेशन्स ।

२. अथर्ववेदः – स्वाध्यायमण्डलम्, पारडीनगरम्, गुजरात ।

३. शुक्लयजुर्वेदः – महीधरभाष्य–डॉ.रामकृष्णशास्त्री, चौखम्बाविद्याभवन, वाराणसी।

४. ऋग्वेद–संहिता, सायणाचार्यकृत – भाष्यसंवलिता, हिन्दी अनुवादसहिता, अनुवादकः – पण्डित रामगोविन्दत्रिवेदी, चौखम्बाविद्याभवन वाराणसी ।

५. ऋग्वेद–संहिता, श्रीमत्सायणाचार्यविरचितभाष्यसमेता, वैदिकसंशोधनमण्डल, पुणे ।

६. वैदिकसूक्तसंग्रहः, सायणाचार्यकृत–भाष्यसंवलितः, हिन्दी अनुवादसिहतः, अनुवादकः – प्रो.देवेन्द्रनाथ पाण्डेयः, प्रकाशक–जगदीश संस्कृतपुस्तकालय, जयपुर, २००३ ।

७. ऋग्वेद–ज्योति, सम्पादक – डॉ.रामनाथवेदालङ्कारः, प्रकाशक– गोवन्दिराम हासानन्दः, नई सडक, दिल्ली – ११०००६ ।

८. ऋक्सूक्त–संग्रह–सम्पादकः तारिणीश झा, प्रकाशक– प्रकाशनकेन्द्र, सीतापुररोड्, लखनऊ

९. ऋग्वेद–संहिता, सम्पादकः – श्रीमन्मोक्षमूलरभट्टः, चौखम्बा–कृष्णदाश अकादमी, वाराणसी ।


—०—


*वैदवेदाङ्गसङ्कायाध्यक्षः, श्रीसोमनाथसंस्कृतयूनवर्सिटी,*
*वेरावलम्, गुजरात ।*


Scanned by CamScanner